[KYV – TA 1-22-1 to 1-22-7]

ॐ योऽपां पुष्पं वेद । पुष्पवान्प्रजावान्पशुमान्भवति ।
चन्द्रमा वा , अपां पुष्पम् । पुष्पवान्प्रजावान्पशुमान्भवति ॥ १ ॥

ॐ yō (a)pām' puṣh'pam' vēda ।
puṣh'pavān' prajāvāān' paśhumān' bhavati ।
chan'dramā vā , apām' puṣh'pam'm ।
puṣh'pavān' prajāvāān' paśhumān' bhavati ॥ 1 ॥

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।
ya , ēvam' vēda । yō (a)pāmāyatanam' vēda ।
āyatanavān'bhavati ।

अग्निर्वा , अपामायतनम् । आयतनवान्भवति । योऽग्नेरायतनं वेद ।
आयतनवान्भवति । आपो वा , अग्नेरायतनम् । आयतनवान्भवति ॥ २ ॥

ag'nir'vā , apāmāyatanam । āyatanavān'bhavati ।
yōō (a)g'nērāyatanam' vēda । āyatanavān'bhavati ।
āpōvā , ag'nērāyatanam । āyatanavān'bhavati ॥ 2 ॥

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।
ya , ēvam' vēda । yō (a)pāmāyatanam' vēda ।
āyatanavān'bhavati ।

वायुर्वा , अपामायतनम् । आयतनवान्भवति । यो वायोरायतनं वेद ।
आयतनवान्भवति । आपो वै वायोरायतनम् । आयतनवान्भवति ॥ ३ ॥

vāyur'vā , apāmāyatanam । āyatanavān'bhavati ।
yō vāyōrāyatanam' vēda ।
āyatanavān'bhavati । āpō vai vāyōrāyatanam ।
āyatanavān'bhavati ॥ 3 ॥

www.SaiVeda.net

य , ए॒वं वेद॑ । यो॒ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान्भवति ।

ya , ēvaṁ’ vēda | yō (a)pāmāyatanaṁ’ vēda |

āyatanavān’bhavati |

अ॒सौ वै तप॑न्न॒पामा॒यत॑नम् । आ॒यत॑नवान्भवति ।
यो॒ऽमुष्य॒ तप॑त , आ॒यत॑नं॒ वेद॑ । आ॒यत॑नवान्भवति ।
आपो॒ वा , अ॒मुष्य॒ तप॑त , आ॒यत॑नम् । आ॒यत॑नवान्भवति ॥४॥

asau vai tapan’napāmāyatanam | āyatanavān’bhavati |

yō (a)muṣh’ya tapata , āyatanaṁ’ vēda |

āyatanavān’bhavati |

āpō vā , amuṣh’ya tapata , āyatanam |

āyatanavān’bhavati || 4 ||

य , ए॒वं वेद॑ । यो॒ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान्भवति ।

ya , ēvaṁ’ vēda | yō (a)pāmāyatanaṁ’ vēda |

āyatanavān’bhavati |

च॒न्द्रमा॒ वा , अ॒पामा॒यत॑नम् । आ॒यत॑नवान्भवति ।
यश्च॒न्द्रम॑स , आ॒यत॑नं॒ वेद॑ । आ॒यत॑नवान्भवति ।
आपो॒ वै च॒न्द्रम॑स , आ॒यत॑नम् । आ॒यत॑नवान्भवति ॥५॥

chan’dramā vā , apāmāyatanam | āyatanavān’bhavati |

yaśh’ chan’dramasa , āyatanaṁ’ vēda |

āyatanavān’bhavati |

āpō vai chan’dramasa , āyatanam |

āyatanavān’bhavati || 5 ||

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।

ya , ēvaṁ’ vēda | yō (a)pāmāyatanaṁ’ vēda |

āyatanavān’bhavati |

नक्षत्राणि वा , अपामायतनम् । आयतनवान्भवति ।
यो नक्षत्राणामायतनं वेद । आयतनवान्भवति ।
आपो वै नक्षत्राणामायतनम् । आयतनवान्भवति ॥ ६ ॥

nak’ṣhat’rāṇi vā , apāmāyatanam | āyatanavān’bhavati |
yō nak’ṣhat’rāṇāmāyatanaṁ’ vēda |
āyatanavān’bhavati | āpō vai nak’ṣhat’rāṇāmāyatanam |
āyatanavān’bhavati || 6 ||

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।

ya , ēvaṁ’ vēda | yō (a)pāmāyatanaṁ’ vēda |

āyatanavān’bhavati |

पर्जन्यो वा , अपामायतनम् । आयतनवान्भवति ।
यः पर्जन्यस्याऽऽयतनं वेद । आयतनवान्भवति ।
आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान्भवति ॥७॥

par’jan’yō vā , apāmāyatanam | āyatanavān’bhavati |
ya[fp]’ par’jan’yas’yā (ā)yatanaṁ’ vēda |
āyatanavān’bhavati | āpō vai par’jan’yas’yā (ā)yatanam |
āyatanavān’bhavati || 7 ||

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।

ya , ēvaṁ’ vēda | yō (a)pāmāyatanaṁ’ vēda |

āyatanavān’bhavati |

www.saiveda.net

संवत्सरो वा , अपामायतनम् । आयतनवान्भवति ।
यस्संवत्सरस्याऽऽयतनं वेद । आयतनवान्भवति ।
आपो वै संवत्सरस्याऽऽयतनम् । आयतनवान्भवति ॥८॥

samṁ’vat’sarō vā , apāmāyatanam I āyatanavān’bhavati I
yas’samṁ’vat’saras’yā (ā)yatanamṁ’ vēda I
āyatanavān’bhavati I
āpō vai samṁ’vat’saras’yā (ā)yatanam I
āyatanavān’bhavati II 8 II

य , एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥९॥

ya , ēvamṁ’ vēda I
yōō (a)p’su nāvam’ pratiṣh’ṭhitāmṁ’ vēda I
prat’yēva tiṣh’ṭhati II 9 II

राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु ।

rājādhirājāyap’ prasah’yasāhinēē I
namō vayamṁ’ vaiīśh’ravaṇāya kur’mahē I
sa mē kāmān’kāmakāmāya mah’yam’m I
kāmēśh’varō vaiīśh’ravaṇō dadātu I

कुबेराय वैश्रवणाय । महाराजाय नमः ॥१०॥

kubērāya vaiśh’ravaṇāya I mahārājāya namaḥa II 10 II

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi II

www.Sai Veda.net